## || श्री स्वामी समर्थ ||

---

## || उग्रतारा कवचम्|

---

कैलासशिखरारूढं देवदेवं जगद्गुरुम।
पप्रच्छ पार्वती देवी साधकानुग्रहेच्छया ॥
पार्वत्युवाच
त्वत्प्रसादान्महादेव भ्रैरवेणोदितं पुरा।
कवचं श्रोतुमिच्छामि तारिकाया मनोहरम्॥
श्रुत्वा नगात्मजावाक्यं विहस्य परमेश्वरः ।
महाप्रीत्या परिष्वज्य साधु साध्विति वादयन् ॥
शृणु तत्कवचं देवि अज्ञानेन्धन पावकम्।
यस्य स्मरणमात्रेण तारिका संप्रसीदति ॥
पदासाद्य महात्मानो धर्मकामार्थ मुक्तिषु।
नासाध्यं मेनिरे किञ्चत्कवचं शुद्धबुद्धयः ॥
प्रत्यालीढपदार्षितांघ्रि शवहद् घोराट़टहासा रवा।
खडगेन्दी वरकर्त्रीखर्परभुजा हूंकारबीजोद्धवा ॥
खर्वा नीलविशाल पिंगलजटाजूटोग्र नागोज्ज्वला।
जाड्यं चैव कपालके त्रिजगतां हन्तयुग्रतारास्वयम्॥
विनियोग
अस्य श्री तारा कवचस्याक्षोभ्यतऋ्रषिर्वृहती छन्दः, श्रीउग्रतारा देवता,
सर्वकामार्थं साधने विनियोगः।
अथ कवचम्
संसारतारिणी तारा पूर्वस्यां पातु मां सदा।

प्रत्यालीढपदा घोरां तथाग्नेय्यां जगन्मयी ॥
उग्रतारा पातु याम्यां यमभीति विनाशिनी।
नैऋत्यां चण्डिका पातु मुंडमालाविभूषिता ॥
खर्वा लम्बोदरी भीमा व्याघ्रचर्मावृता कटौ।
एकजटा सदा पातु पश्चिमे च हरप्रिया ॥
नवयौवन सम्पन्ना पञ्चमुद्रा विभूषिता।
नीलसरस्वती पातु वायव्ये पुत्रिणी सदा॥
खालार्कं मण्डलाकार लोचनत्रयं भुषिता।
कौबेर्यां च महातारा पातु नित्यं सुरप्रिया ॥
चतुर्भुजा ललज्जिह्या भीमरूपा महाबला।
भैरवी च तथा पातु एशान्यां दिशि मां सदा ॥
खड्गकर्तुधारा सव्ये वामे चोत्पलखर्परा ।
ऊर्ध्वे वागीश्वरी पातु द्रुतबुद्धिकरी सदा॥
पिङ्गलो्धंजटामध्ये वासुकीषु नियोजिता।
सावेशस्मेर वदना वस्त्रालङ्धार भूषिता ॥
मस्तकं पातु मे पद्या शवेतपद्यान्तरस्थिता।
भालं मे पातु पद्या च नासिकां रूपधारिणी ॥
सुन्दरी पातु नेत्रे च सर्वानन्दस्वरूपिणी।
श्रवणे सर्वदा पातु कालिका मुण्डमालिनी ॥
श्यशानभैरवी पातु स्कन्धं मे सर्वदेव हि।
आनन्दभैरवी बाहू पातु नित्यं सुरप्रिया॥
हस्तौ रक्षतु शर्वाणी हदयं पातु सर्वदा।
मध्यं रक्षतु मातङ्गी नाभि पातु सुरेश्वरी ॥
कटि कामेश्वरी पातु भक्तकामप्रपूरिणी ।
भुवनेश्वरी सदा पातु ऊरू मे सर्वमङ्गला ॥
महात्रिपुरसुन्दरी च जानुनी पातु सर्वदा।

अश्वारूढा तथा जंघे प्रचण्डासुरधातिनी ॥
भद्रकाली तथा पादौ पायाच्च भद्रहारिणी।
सर्वत्र त्वरिता पातु सर्वत्र हितकारिणी ॥
अग्रतः षोडशी पातु देवी त्रिपुरसुन्दरी।
पृष्ठतो मे गुह्यकाली नित्यं रक्षतु शोभना ॥
कृष्णदेहा दक्षरपार्श्वे नित्यं पातु सुशोभना।
वामपाश्वे सदा पातु रक्तबीजविनाशिनी ॥
इत्येतत्कवचं प्रोक्तं सर्वकामार्थसिद्धिम्।
गोपनीयं सदा देवि न कस्मैचित्परदर्शयत्॥
यः सकृच्छरुणुयादेतत्कवचं भैरवोदितम्।
सर्वान् स लभते कामान् परत्र शिवरूपता ॥
सकूयस्तु पठेनित्यं कवचं भेरवोदितम्।
स च सर्वं यज्ञफलं लभते नात्र संशयः॥ ,
संग्रामे संजयेच्छत्रून्मातङ्गानिव केसरी।
दहेतृणं यथा वन्हिस्तथा शत्रुन्दहेत्सदा ॥
न शस्त्राणि न चास्त्राणि शरीरे प्रभवन्ति हि।
न तस्य जायते व्याधिर्न च दुःखं कदाचन॥

---

॥ श्री गुरुदत्तात्रेयार्पणमस्तु ॥
|| श्री स्वामी समर्थापर्ण मस्तु||